# श्रीनृसिंहविज्ञापनम्

DR.RUPNATHJI( DR.RUPAK NATH )

## श्रीनृसिंहाश्रममुनिभिर्विरचितं

# श्रीनृसिंहविज्ञापनम्

श्रीविश्वेश्वरः शरणम्

DR.RUPNATHJI(DR.RUPAK NATH)

यस्माद्धियेव मनसा सह वैदिकी वाक्
दूरे चरत्यमुमथापि तदेकभावा ।
आनन्दबोधघनमेकमशेषयोनिं
संसूचयत्यहमिमं नृहरिं प्रपद्ये ॥ १ ॥

त्वं सर्वस्य हरे गुरुस्तत इयं विज्ञापना श्रूयतां
त्वत्तोऽवेदिषमञ्जसा तदधुना त्वां श्रावयामि प्रभो ।
युक्तायुक्तविचारणे नरहरे नान्यं विलोकेऽधुना
श्रुत्वा त्वं कुरु मानसे तदखिलं श्रेयः परं यास्यति ॥ २ ॥

यत्सद्विश्वमजीवयन्न च परा सत्ताऽस्ति संवित्स्वयं
सुप्तं सर्वमबोधयन्न च परं ज्योतिर्विनाऽन्या प्रथा ।
आनन्दोऽपि निजेन येन निखिलानानन्दयत्यात्मना
सोऽयं श्रीनरकेशरी विजयतां भूमान्तरात्मा हृदि ॥ ३ ॥

सर्वत्र सत्तावगमः परेश
त्वय्येव तिष्ठत्यपरं न याति ।
अवारितं नीडमनीक्षमाणः
सदेव सोम्येतिवचोऽपि तद्वत् ॥४॥

सदेव सोम्येदमितिश्रुतिश्च
त्वां विश्वयोनिं प्रभुमाह सन्तम् ।
कार्यं प्रकृत्यात्मकमेव दृष्टं
ततो मृषार्थेऽपि तथा प्रतीतिः ॥५॥

सत्ता परा जातिरिति प्रमाणं
विना न सिद्ध्यत्यखिलार्थसत्ता ।
जातिः कथं सा च सती कथं स-
द्बुद्धिः प्रकृत्यात्मतयोपपन्ना ॥६॥

तस्मात्परस्मात्पर ईश एव
सद्वस्तु नान्यत्कथितोपपत्तेः ।
बोधोऽपि नान्यस्त्वदृते विचारे
प्रमाणतः कश्चिदुपैति बुद्धिम् ॥७॥





पुमान्स्वयञ्ज्योतिरितीदृशानि
वचांसि विज्ञानघनं पुमांसम् ।
प्रसाधयन्त्यादरतः परस्मात्
पुनः पुनर्देववर प्रसीद ॥८॥

न चास्य बाधं निपुणेन चेतसा
निरीक्षमाणोऽपि दृढं निरीक्षते ।
यदादरेण श्रुतिराह तत्र
प्रवृत्तबाधं श्रुतिरेव बाधते ॥९॥

तात्पर्यबोधस्त्वयि शब्दशक्ति-
पूर्वापरादिप्रतिसन्धितः स्यात् ।
न वेदबाह्यागमतर्कलिङ्गैः
तस्मात्स्वतस्त्वं प्रथसेऽन्तरात्मन् ॥१०॥

न त्वामृतेऽखिलदृशं हृदि संश्रिता ये
कामादयः कथमपि प्रकटा भवेयुः ।
एकेन सम्भवति तत्स्फुरणे प्रतीचा
कः कल्पयेत्स इव तानि बहून्यभिज्ञः ॥११॥

DR.RUPNATHJI( DR.RUPAK NATH )

नेच्छादिवत्पृथगिहानुभवेऽस्ति हेतुः
नाप्यस्ति संविदि तथा व्यभिचारिभावः ।
मेयस्य लोपकृत एव तदास्य लोपः
तस्मात्स एव भगवान्हरिरन्तरात्मा ॥१२॥

ध्यानादिकाले सहितस्य[1] बोधः
कालान्तरे तद्विरहादबोधः ।
विना न तं संव्यवहार एवं
ध्यातं मयेति स्मृतितोऽपि नैषः ॥१३॥

पूर्वानुभूतिं विरहय्य साऽपि
कथं न लिङ्गादपि तस्य बोधः ।
तस्मात्स्वतस्सिद्धनिजानुभूत्यां
प्रसूयते ध्यानसुखादिवार्त्ता ॥१४॥

ये त्वां विना निजमनीषितकल्पनाभिः
तुष्यन्त्यहो जडधियोऽनुपदं स्खलन्ति ।
ज्ञानं सुखस्य जनकत्वधिया कथं ते
वाञ्छेयुरस्य तदसम्भवतः स्वपक्षे ॥१५॥

1 सहि तस्य





ज्ञाने सुखे च विदिते ननु सा मतिः स्यात्
तद्वेदनं न निजबोधमृते परेशम् ।
ज्ञानात्सुखे सति हि तस्य धियोऽवकाशः
तत्पूर्वमेव विलयान्न हि बोधधीः स्यात् ॥१६॥

ज्ञाने च तस्य चिरलुप्ततया सुखस्य
ज्ञाते कथं न च समूहमतिः कथञ्चित् ।
साऽपि क्रमं कथयितुं तव नैव शक्ता
तस्मात्त्वमेव शरणं द्विषतामपीश ॥१७॥

स्वप्नेऽनुभूतिरपि या च सुषुप्तिकाले
सा त्वां विना भवति का नृहरे प्रमाणी ।
सा चाद्वयैव निखिलाशयसाक्षिणीशे
न ह्यस्ति भेदमवभासयितुं प्रमाणम् ॥१८॥

जन्मादिभावविकृतिः खलु बुद्धिवृत्तेः
सा संविदः पृथगिति प्रतिपादयामः ।
जानामि कुम्भमिति तामनुभूतिवेद्यां
विघ्नो न ते विषयिणो विषयत्वयोगः ॥१९॥

DR.RUPNATHJI( DR.RUPAK NATH )

सा त्वां हरे निखिलदृङ्ग हि संविदोऽन्यं
त्वामामनन्ति मुनयः श्रुतयश्च नो वा ।
संयोगमन्यमपि वा युवयोर्विचारे
योगं विदन्ति कुशलास्त्वमतोऽनुभूतिः ॥२०॥

दृश्यं पुमान्न भवतीति घटादि दृष्टं
भिन्नं स्वतोऽनुभवनादखिलं यदेतत् ।
दृश्यन्ततोऽपि न भवाञ्जगदन्तरात्मा
दृग्रूपतः पृथगतो भगवान्परात्मा ॥२१॥

प्रेमा परः[1] पुरुष आ शुनकादिजन्तोः
दृष्टस्सुखैकविषयस्स च वोऽविवादः ।
आनन्दयत्यपरमेष इति श्रुतेश्च
सिद्धः पुमान्सदनुभूतिसुखैकरूपः ॥२२॥

सरसि रविरिवोद्यन्सम्प्रविश्यान्तरात्मा
हृदि शुभमशुभं वा निर्विकारोऽपि भुङ्क्ते ।
न खलु भगवतोऽन्यो जीव इत्यत्र मानं
यत इह विपरीतं रूपमज्ञानतोऽभूत् ॥२३॥

1 प्रेमापरः





अज्ञानमस्त्यपरबोधवपुष्यनन्ते
नो चेन्न जान इति धीस्त्वयि मे कथं स्यात् ।
न त्वत्स्वरूपविरहोऽस्ति न वृत्त्यभावात्
एषा घटेत यदसि त्वमनन्यबोधः ॥२४॥

स्वात्मावबोधवपुषो न तयाऽस्ति वृत्त्या
स्फूर्तिस्तदा खलु विना न तयाऽप्रकाशः ।
तस्मादनन्तविभवे त्वयि भासमानेऽ-
बोधः कथं निकटदेशमपि स्पृशेन्नः ॥२५॥

वृत्त्या विनाऽपि मयि साक्षिणि भासमाने
भास्येषु केषुचिदयं न हि दृष्टपूर्वः ।
अज्ञानवृत्तिविरहे न भवेत्कथञ्चित्
अज्ञानता न हि घटस्य लये घटत्वम् ॥२६॥

ज्ञानात्पृथग्भवति यद्यपि वृत्तिरेषा
तन्मिश्रमेव वदितुं स्फुरणं समर्था ।
ज्ञानेतिगीर्न हि सुखात्मकबोधमेकं
वक्तुं विविच्य निपुणेति तदर्थताऽस्याः ॥२७॥



DR.RUPNATHJI( DR.RUPAK NATH )

त्वदन्ययोगोऽपि हरे त्वदीय-
मायां विना न त्वयि भासमाने ।
आध्यासिकं योगमपास्य तस्य
नान्योऽस्ति सोऽप्यस्ति विना न मायाम् ॥२८॥

आत्मानमेकमपरानुभवप्रकाशं
त्वां त्यक्तुमद्य बहुविद्भिरुपास्यमानम् ।
नेशे ह्यदृष्टिमनुसृत्य[1] ततस्त्वदीय-
मायाविमूढविभवोऽल्पमतिर्न जाने ॥२९॥

अस्मि प्रकाश इति संव्यवहारयोग्ये
विष्णो त्वयि व्यवहृतिर्विपरीतमार्गा ।
दृष्टा ततस्त्वयि मृषा विपरीतयोग्य-
भावोऽप्रबोधकलितोऽनवभाससञ्ज्ञः ॥३०॥

परिकल्पितोऽपि रशनाभुजगो
रशनार्थिनं ननु ततो विमुखम् ।
कुरुतेऽयमप्यनुभवात्मगतः
तनुते तमेव पुरुषं कृपणम् ॥३१॥

1 नेशोऽह्यदृष्टिमनुसृत्य





नन्वेवं सकलार्थदृग्यदि हरिर्मायां प्रविश्याऽभवत्
जीवस्तर्ह्यधुनेशवत्त्वमपि किं सर्वं न वेत्सि स्फुटम् ।
मायामूढतया न वेत्सि सकलं त्वं चेत्कथं केशवो
विद्यान्नो युवयोः कियत्यपि भिदा श्रौते मते श्रूयते ॥३२॥

सन्भेदः परजीवयोः किममुना चोद्येन संसाध्यते
किं वा वर्णितदोषमात्रशमनं जिज्ञाससेऽस्मन्मते ।
यद्याद्यो विफलश्रमोऽसि न वयं चेच्छावशादीश्वरात्
जीवे भेदनिराकृतिं वितनुमोऽभेदस्य यूयं यथा ॥३३॥

सत्यं ज्ञानमनन्तमद्वयमयं ब्रह्मेति नेतीति च
श्रुत्या सत्सुखचित्प्रकाशममलं ब्रह्मात्मतत्त्वं परम् ।
विस्रस्ताखिलभेदराशि विदितं न्यायैश्च सौत्रैः स्थिरं
तस्य त्वं यदि दूषणेऽद्य यतसे नूनं निरर्थश्रमः ॥३४॥

किं प्रत्यक्षमथापरं किमपि वो भेदे प्रमाणं मतं
नाद्यस्तत्परमेश्वरेऽनुपहिते जीवस्वरूपे यतः ।
ज्ञानं नोत्सहते स्फुटं जनयितुं तेन स्वभेदं कथं
साक्षात्कर्त्तुमहं प्रभुर्नयनतो बोद्धुं कथं नेश्वरः ॥३५॥



DR.RUPNATHJI( DR.RUPAK NATH )

देहादिसंहतवपुष्यवरे परस्मात्
भेदोऽनुभूतिविषयोऽस्तु यथा तथा सा ।
चन्द्रे स्वभेदरहितेऽपि यतोऽप्सु दृष्टो
भेदः पृथक्पदमिदं प्रमितिद्वयं न(नः) ॥ ३६ ॥

घटादिभेदग्रहणेऽपि हेतुं
तद्योग्यमावेदयितुं न कोऽपि ।
शक्तः पुनः सर्वगतात्परस्मात्
त्वत्तो विभेदं मयि किं वदेत्सः ॥ ३७ ॥

अद्यावयोर्भेदकथाप्रसक्तौ
तत्पूर्वपक्षे परिवर्त्तमाने ।
भेदस्य सत्ताबललभ्यहेतु-
प्रत्यक्षबाधं त्यज मौढ्यमूलम् ॥ ३८ ॥

भेदे हि नाध्यक्षमिह प्रमाणं
तद्धेतुयोग्यानुपलम्भलोपात् ।
विश्वं समस्तं न मिथः पृथक्स्यात्
इत्यत्र नैवानुपलम्भसत्ता ॥ ३९ ॥





अभेदबोधे न हि भेदसंवित्
भवेदिति त्वन्मतसिद्धमेतत् ।
धर्मैक्यबोधे सति भेदसिद्धिः
तन्मात्रविश्वस्य कथं भवेत्सा ॥ ४० ॥

घटोपलम्भेन पटात्मतायाः
स्फूर्त्तिस्ततो भेदमतिर्भवेच्चेत् ।
या न स्फुरत्यत्र पदात्मता[1] सा
धर्म्यात्मतायाः पृथगस्ति कापि ॥ ४१ ॥

यतः कुतश्चिन्न हि येन केन
रूपेण वा कस्यचिदस्ति भेदः ।
इति स्थितिं दूषयति स्वपक्षं
स्थिरं विधाय स्वमतानुरागात् ॥ ४२ ॥

विनिश्चिते कुम्भपटादिरूप-
भेदे ततस्तन्मतिभेदनिश्चयः ।
ततश्च तद्भेदविनिश्चयोऽयम्
एवं दुरात्मा स परस्पराश्रयः ॥ ४३ ॥

1 पटात्मता

DR.RUPNATHJI( DR.RUPAK NATH )

विशिष्टरूपानुभवोस्तु मा वा
नैतावता धर्मिषु भेदसिद्धिः[1] ।
विशिष्टभेदेऽपि हि वस्त्वभेदो
दृष्टः परत्रास्तु तथेह दृश्ये ॥४४॥

तस्मान्नाध्यक्षमत्र प्रभवति नतरां लिङ्गशब्दादिराशिः
तत्सापेक्षोद्भवत्वान्न हि भवति परं किञ्चिदत्र प्रमाणम् ।
क्लृप्तेनैव प्रकाशो बहिरपि रशनासर्पवत्साक्षिणैवं[2]
मानं नापूर्वमेकं किमपि जगति नः कल्पनीयं कथञ्चित् ॥४५॥

भेदः कीदृश आश्रयोऽस्य क इह ज्ञानं कथं जायते
को वैतत्प्रतियोग्यपीति विमृशन्को वैनमिच्छेत्सुधीः ।
अध्यस्तोऽयमशेषदृश्यनिलयः स्थानेनुसन्ध्ये यथा
तद्वन्न व्यवहारसङ्कर इह स्वप्नोपमाद्भेदतः ॥४६॥

आत्मा निरस्तविषयो गगनोपमानो
नैवास्य भाविकभिदास्पदतानुमानात् ।
मायां प्रविश्य पर एव हि जीवसञ्ज्ञाम्
आश्रित्य संसरति संव्यवहारकाले ॥४७॥

1 भेदसिद्धः
2 रशनासर्पवत्साक्षिणैवं





लोके हि बिम्बात् प्रतिबिम्बवक्रम्
अभिन्नमेवेति मितिप्रसिद्धम् ।
तथापि नानात्वविरूपतादि
बिम्बे निषेधत्यवरोऽपि जन्तुः ॥४८॥

एवं परात्मा विमलोऽपि जीव-
भावेन संसारमलं बिभर्त्ति ।
नैवात्र किञ्चिद्विपरीतमस्ति
मलोऽपि नानात्वविरूपतुल्यः ॥४९॥

तस्माज्जीवो मायया लुप्तबोधः
स्वात्मानं वा सर्वमन्यन्न वेत्ति ।
विष्णुः शुद्धोऽनावृतात्माऽवबोधः
सर्वं वेत्तीत्यत्र किं वास्त्यवद्यम् ॥५०॥

मा भूत्सर्वार्थवित्ता कियदपि च कथं स्तम्भकुम्भादि विद्यात्
जीवो मायाविमूढो न हि भवति तदा कोऽपि वित्तेरुपायः ।
वित्तेर्लोपे न[1] कामो भवति न हि तदा काऽपि चेष्टाऽधुनापि
स्यादेवं सर्वलोपः श्रुतिमतनिरतेष्वस्मदीयेषु नैवम् ॥५१॥

1 वित्तेर्लोपेन कामो



DR.RUPNATHJI( DR.RUPAK NATH )

मैवं न तार्किकमते व्यवहारहेतुः
पुंसो जडस्य न हि बोधमृते प्रवृत्तिः ।
बुद्धिर्गुणो यदि भवेत्पुरुषस्य तस्य
साऽपि स्वभावजडता(?) न भवेत्प्रकाशः ॥५२॥

जडाऽपि सा चेद्व्यवहारहेतुः
इच्छादिरप्यस्तु तया विनैवम् ।
तमप्यबोधं पुरुषं करिष्य-
त्यजस्रभूतिश्च भवेन्न धीवत् ॥५३॥

कामादिसिद्धिस्तत एव भूयात्
तस्यापि सिद्धिस्तदधीनलाभा ।
न किञ्चिदप्यस्ति जडावबोधात्
फलं जयत्वन्धपरम्परैषा ॥५४॥

अस्तु काचन मतिर्जडस्य सा
व्याप्य तिष्ठति न पूरुषं पुनः ।
एकदेशनिलया मतिः कथं
दूरवृत्तिविषयेण सङ्गता ॥५५॥





एकदेशनिलयस्य चिन्तने
किं किमत्र न विचार्यमस्तु तत् ।
सङ्गतिं च विरहय्य किं तया
बाह्यदेशविषये विधीयताम् ॥५६॥

सर्वदेशविषयेष्वपि पुंसः
कामतो व्यवहृतिर्न भवेत्किम् ।
अस्य सा मतिरितिव्यवहारः
त्वन्मते कथमहो उपपाद्यः ॥५७॥

धीस्वरूपमपरस्य च रूपं
सङ्गतिर्न पृथगस्ति गौतमी ।
पुंस्प्रवृत्तिमपरत्र निवृत्तिं
सा करोति नियमेन नो मते ॥५८॥

नोक्तदोषकवलीकृतमेतत्
न स्वरूपमपरत्र विरूपम् ।
तत्स्वरूपमपरस्य च रूपम्
अन्तरा भवति कापि भवेत्सा ॥५९॥

DR.RUPNATHJI( DR.RUPAK NATH )

द्वयस्वरूपं यदि सङ्गतिः स्यात्
सम्बन्धिता कस्य भवेत्परस्य ।
सम्बन्धभिन्नो यदि कोऽपि नेष्यते
सम्बन्धतैवास्य तदा विलुप्यते ॥६०॥

श्रुतिप्रसिद्धाप्यभिदा निरस्यते
प्रत्यक्षमानस्य सुरक्षणाय ।
तस्यैव मानत्वमपास्यता त्वया
स्वेच्छाविहारः प्रकटीकृतः स्यात् ॥६१॥

दिशानयैवापरभेदिनां मतं
निरस्तमेवेति न यत्यते मया ।
ततः प्रमात्रादिमुखः प्रपञ्चो
मायाप्रसूतः परिभावनीयः ॥६२॥

यद्यप्यज्ञानमास्ते विगलितनिखिलोपाधिचैतन्यरूपे
तस्यैवासौ प्ररोहे जल इव सवितुर्जीवरूपे श्रुतेस्तत् ।
तं प्रत्येवास्य रूपं विमलमपि सुखं स्वप्रकाशं पिधत्ते[1]
चैतन्यं नैव गुप्तं न हि भवति तदाऽज्ञानसिद्धिः कुतश्चित् ॥६३॥

1 हि धत्ते





अज्ञानाश्रयभूतमप्यमलतां नैवोज्झति त्वत्पदं
विष्णो त्वय्यखिलं जगत्प्रविततं किन्तेन ते हीयते ।
न त्वां प्रत्यपि सच्चिदद्वयसुखात्मानं तदाच्छादय-
त्यज्ञत्वं प्रसजेद्भवत्यपि तदा लुप्येत सर्वज्ञता ॥६४॥

यः सर्वज्ञ इतीदृशानि वचनान्याहुः परं सर्वगं
सर्वज्ञं सकलेश्वरं नरहरे त्वां नैव तद्दुष्यति ।
न ह्यन्धस्य सहस्ररश्मिविभवे दृष्टिर्न दृष्टेति त-
न्माहात्म्यस्य पराभवो मयि तथा मूढेऽपि किं ते वद ॥६५॥

तच्चैतन्यं न भिन्नं यदि भवतु तथाऽभासमानात्स्वरूपात्
एवं सत्यप्यदोषः स्फुरति मयि तव प्रावृतत्वस्य विष्णो ।
अज्ञानं ब्रह्मपूर्णं परिमितमखिलं प्रावरीतुं न शक्तं
येनैवं चित्यपि स्यादमतिकृतमिदं वेष्टनं वेदपक्षे ॥६६॥

स्फुरत्यपि स्वप्रभचित्स्वरूपे
न च स्फुरस्यात्मतया त्वमीश ।
न चोपलब्धेऽनुपपत्तिरस्ति
दृष्टं हि लोकेऽपि तथात्मभेदे ॥६७॥



DR.RUPNATHJI( DR.RUPAK NATH )

किञ्चाप्रबुद्धत्वमिह त्वयीशो
नास्तीति बुद्धिव्यवहारयोग्यता ।
तद्भेद एकानुगतिर्न चान्य-
योग्यत्वसद्भावमपीच्छति ध्रुवम् ॥६८॥

अनावृता संविदशेषवस्तु
प्रकाशमाना स्वगतं प्रकाशयेत् ।
इत्यात्मवादे विषयप्रकाशो
घटिष्यते कल्पनया कथञ्चन ॥६९॥

एवं सतीह निखिलस्य जडस्य भानं
किं नो भवेद्युगपदेव निजानुभूतेः ।
मानं विनापि विषयानुभवस्य सत्त्वात्
अक्षादिनापि भवतो न हि कृत्यमस्ति ॥७०॥

ज्ञानार्थयोग इति चेन्न हि तत्प्रवृत्तेः
प्रागेव तस्य पुरुषे परिकल्पितत्वात् ।
अन्योऽपि योग इह कश्चन दुर्निरूपो
मानेन यो भवति चिज्जडयोर्मते वः ॥७१॥





अज्ञातताभिभवनं फलमित्यपीदं
रिक्तं वचश्चिति न सेति यतस्त्वयोक्तम् ।
नैवास्य पुंव्यवहृतिः फलमेष पक्षो
नित्यात्मबोधफलमेव सुखादिवत्सा ॥७२॥

साक्षिवेद्यमिह यावदशेषं
तत्प्रसिद्ध्यति विना निजमानम् ।
तद्विविच्य कथयामि तवैतत्
श्रूयतां यदि मनीषितमस्ति ॥७३॥

अज्ञानमन्तःकरणञ्च तस्य
कामादयो यस्तदभाव एषः ।
स्वप्नेऽपि यद्यत्तदशेषमेव
विना प्रमाणं निजबोधसिद्धम् ॥७४॥

साक्षी निर्मलचिद्धनः श्रुतिशिरोवाक्येन सिद्धो हरिः
मायागर्भितचित्प्रधानवपुषा पश्यञ्जगद्दीक्षिताम् ।
आपन्नः पुनरस्मदादिमनसा संवेष्टितः स प्रभुः
ध्वान्तं तत्प्रभवं च नः प्रकटयंस्तत्त्वेन सञ्जीयते ॥७५॥



DR.RUPNATHJI( DR.RUPAK NATH )

माता स्वान्तविशिष्ट एव स खलु स्वान्तस्य वृत्त्याप्नुवन्
मेयं मानगणेन तामपि निजां मत्त्वा न आस्ते परः ।
स्वान्तामिश्रितचित् पुनर्वलयिता स्वान्तेन संवीक्षते
तत्तद्धर्मगणं न सा स भवति व्यापारराहित्यतः ॥७६॥

अकर्तृबोधात्मक एव साक्षी
लोकप्रसिद्धो न विलक्षणोऽपि ।
स्वान्तोपधानोऽनुभवो न कर्त्ता
तेनाहमस्यापि भवामि साक्षी ॥७७॥

मानोच्छमित्याय इहात्ममेयं
मिनोति माता स खलु प्रसिद्धः ।
इहाविशिष्टः स च तत्र वृत्तिः
व्यापाररूपास्ति न तद्वियुङ्क्ते ॥७८॥

अतोऽन्तरङ्गं वपुरेव मातुः
चैतन्यमन्तःकरणोपधानम् ।
साक्षीह जीवव्यवहारहेतुः
न तद्बहिश्चिद्यदतिप्रसङ्गः ॥७९॥





कार्यान्वयित्वात्तदभावतश्च
धियोऽस्ति योगो द्विविधोऽपि तत्र ।
मातृत्वसाक्षित्वमिति द्वयं त-
द्विशेषणोपाधितयेति बोद्धम् ॥८०॥

अज्ञानमानमिह नाक्षमतीन्द्रियं हि
ज्ञानं निरूपकममुष्य तथानुभूतेः ।
अज्ञापयच्च तदिदं न तु[1] [2]तन्निरूप्य-
भावेन तत्प्रथयितुं न भवेत्समर्थम् ॥८१॥

नाप्यन्यदस्ति किमपि प्रकटानुभूता-
वस्येति तन्निजमते पुरुषैकवेद्यम् ।
सोऽप्यस्य यस्य निजवस्तु तिरस्करोति
नाहं विजान इति धीर्यदतोऽहमस्मि ॥८२॥

प्रत्यक्षमेतन्न हि लिङ्गयोग्यम्
अध्यक्षसिद्धेऽस्ति न लिङ्गकृत्यम् ।
शब्दस्य वार्त्तानुभवात्परस्तात्
शब्दादृतेऽप्यस्य तथावबोधात् ॥८३॥

---

1 ननु
2 सन्निरूप्यभावेन



DR.RUPNATHJI( DR.RUPAK NATH )

स्वान्तादिबोधे न हि मानमस्ति
मेयस्य मानत्वविरोधतोऽपि ।
न चापरोक्षानुभवेऽन्यदस्ति
माता ततस्तत्प्रथनान्निवृत्तः ॥८४॥

न वा बहिःस्था चितिरस्य साधिका
तदा परस्यापि सुखेऽनुभूतिः ।
कथं मदीयेन भवेद्यथात्मनो
न संशयोऽप्यत्र[1] परस्य युक्तः ॥८५॥

एतेन बाह्या चितिरेव तत्त-
दुपाधिना चिद्वपुषा समीक्ष्यम् ।
समीक्षते स्वान्तगतो न तस्य
दृष्टेरभावादिति तन्निरस्तम् ॥८६॥

स्वान्ताश्रयोऽयं यदि तत्सुखस्य
इष्टा न दृष्टिः परमन्यबोद्धुः ।
कर्त्तुः क्रियात्वं न परत्र दृष्टम्
आयाति तत्स्वां न चितेः क्रियात्वे ॥८७॥

1 संशयोऽप्यस्य



DR.RUPNATHJI( DR.RUPAK NATH )



भोगोऽपि वा स्वान्तचितेः कथं स्यात्
सर्वत्र वा तत्प्रसृतिः कथं न ।
तस्माद्धिया वेष्टित एव साक्षी
तत्तत्स्वदृश्यस्थदृशैव[1] वेत्ति ॥८८॥

सन्ध्येऽपि धामनि पुमानयमेव वेत्ति
यद्येतत्स्वके वपुषि क्लृप्तमशेषमेतत् ।
सुप्तेऽपि सूक्ष्मवपुरप्रकटप्रकाशः
साक्षीति सिद्धमनवद्यमिदं मतं नः ॥८९॥

स्वप्रकाशमपि यत्स्वसङ्गतं
तत्प्रकाशयति नैवमशेषम् ।
ब्रह्मणो निखिलयोनिता श्रुता
नास्य तेन निखिलस्य न बोद्धा ॥९०॥

अज्ञानतज्जनितबुद्धितदीयमन्यत्
आत्माऽवभासयति सङ्गतमप्यसङ्गी ।
अज्ञाननीडमतिशुद्धचिदेव जीव-
भावं गता स इति तेन कथं न योगः ॥९१॥

1 तत्तत्स्वदृश्यस्य दृशैव

बुद्धिश्च जीवचितिमाश्रयतेऽनुभूतेः
तत्रैव तत्प्रसवहेतुसमन्वयाच्च ।
तत्तस्य काममुखधर्मगणस्य योगः
किं वर्णनीय इह साक्षिणि नित्यमुक्ते ॥९२॥

बुद्धिवृत्तिपरिवेष्टनकाले
कुम्भमप्ययमवेक्षितुमीष्टे ।
चक्षुरादिसहकारिबलेन
साऽपि वेष्टयति बाह्यघटादीन् ॥९३॥

नैव याति यदि धीर्बहिर्घटं
कामिनीव कुलजा कथं क्षमः ।
बाह्यमेयमभिवीक्षितुं पुमान्
आपरोक्ष्यमपि तस्य नः कुतः ॥९४॥

वृत्तिनिर्गमनमन्तरेण का
सङ्गतिः कलशसाक्षिणोर्भवेत् ।
सङ्गतेश्च विरहे कथं तु तत्
मेरुवन्नहि परोक्षता मता ॥९५॥





साक्ष्यभेदमपहाय वस्तुनो[1]
नापरोक्ष्यमपि युज्यतेऽस्य तत् ।
साऽपरोक्ष्यमितिमेयतैव चेत्
नापरोक्षविषयत्वमेव तत् ॥९६॥

अर्थापरोक्षत्वमृते कुतः स्यात्
ज्ञानापरोक्षत्वमनन्यहेतु तत् ।
अन्योन्यसाकाङ्क्षमिदं तदा स्यात्
आत्माभिदैवास्य ततोऽपरोक्षता ॥९७॥

किं जातिरूपं तदुताक्षजत्वं
ज्ञानेऽपरोक्षत्वमितोऽन्यथा वा ।
नाद्यद्वयं यत्सुखदुःखसाक्षात्-
कृतौ द्वयं दुर्लभमेव लोके ॥९८॥

सुखादि नित्याद्वयबोधलभ्यं
तथा सति क्वाक्षजधीपदत्वम् ।
सैषानुभूतिस्तव निर्विवादा
प्रागुक्तनीत्या क्व च जातिरत्र ॥९९॥

1 वस्तुना



DR.RUPNATHJI( DR.RUPAK NATH )

धीवृत्तिरप्यत्र न जातियोग्या
यतः सुखादौ न हि किञ्चिदिन्द्रियम् ।
साक्षात्त्वयोग्येन्द्रियजन्यवृत्तिः
नान्येति नैषाऽश्रयमन्तरेण ॥ १०० ॥

तस्मादभेदः खलु साक्षिणाऽस्य
सुखादिवत्स्यादपरोक्षता या ।
तदर्थयोगादपरोक्षता धियो[1]
नाक्षार्थजत्वं न च जातिरूपा ॥ १०१ ॥

वृत्तिरप्यपृथगेव बुद्धितः
तत्प्रवेष्टितबहिश्चितिरेषा ।
तेन साक्षिवपुषा न भिद्यते
तस्य भेदकधिया परिवेषात् ॥ १०२ ॥

उत्पद्यमानेन घटेन पूर्वं
बाह्यं वियत्कुम्भवियत्यभिन्नम् ।
यथा कृतं चित्प्रथमं बहिस्स्था
धिया तथा साक्षितया कृता सा ॥ १०३ ॥

1 ताधियो





घटादिपूर्वं स्वचिदन्वितं त-
द्विवर्त्तभावादधुनाऽपि तद्वत् ।
चितोश्च भेदेऽपगते स्ववृत्त्या
साक्ष्यन्वितं स्पष्टमवैमि सर्वम् ॥ १०४ ॥

कुम्भान्विता यद्यपि चित्परैव
बिम्बात्मिका विश्वविवर्त्तहेतुः ।
तथापि सा चिद्वपुषा न भिन्ना
ततो यतोऽयञ्च चिदेकरूपः ॥ १०५ ॥

बिम्बात्मतायामपि सुस्थितायां
चिदात्मनानेन द्युतिं प्रपेदे ।
तदापि योगो न हि विश्वभर्त्तुः
विच्छिद्यते सर्वमयस्य तेन ॥ १०६ ॥

एवञ्च वृत्तिस्सफलैव किञ्चा-
ज्ञानत्वनाशाय[1] तथार्थनीया ।
अज्ञातपूर्णात्मविवर्त्त एष
घटादिरित्यस्ति तदप्रबोधः ॥ १०७ ॥

1 अज्ञातत्वनाशाय



DR.RUPNATHJI( DR.RUPAK NATH )

वृत्त्या यदास्यावरणप्रणाशः
तदा स्फुटात्मानुभवेन योगः ।
तदाऽपरोक्षोऽयमिति स्वबुद्धिः
स्वतः परोक्षेऽपि घटादिरूपे ॥१०८॥

न चास्य योगः स्वयमेव पुंसा
समर्थ एवं व्यवहारयोगे ।
भ्रमास्पदेऽप्यस्ति विशेषयोगः
पुंसा तथाप्यस्य तथा न बुद्धिः ॥१०९॥

तदाकृतिर्धीर्विकृतिः स्वकीय –
मेयं यदाश्लिष्य तथाविधं नः ।
निवारयत्यावरणं पटादिः
तदा स्फुटं नः प्रतिभासमेति ॥११०॥

न चैवमन्योन्यसमाश्रयत्वं
यदेतदित्थं व्यवहारबीजम् ।
अनात्मनो ज्ञाननिवर्त्तने तु
पुंयुक्तमेयावगतित्वमेव ॥१११॥





तस्माद्धिया व्यक्तचितावमर्शोऽ -
परोक्षवद्भाति घटादिरेषः ।
न वस्तुतोऽस्त्यस्य जडत्वतोऽतः
सत्तेव चित्स्यादपरोक्षताऽपि ॥११२॥

प्रवृत्तिरेषाऽनवबोधनाशे
पुंसो भवेत्साऽपि फलं कथं न ।
क्वचिच्च साक्षादपि तन्निदानं
ज्ञानं ततो मानमनर्थकं न ॥११३॥

यत्रास्ति योगो न धियः पटादौ
तत्साक्षिभेदो न निवारितोऽस्ति ।
इति प्रमेयं तदशेषमेव
परोक्षमस्माकमिदं मतं नु ॥११४॥

परोक्षवृत्तिस्तु बहिःप्रमेयं
न काऽपि यायात्कुलजाऽबलेव ।
न तत्र नेत्रादिभिरर्थयोगः
तदेकयाना हि मतिप्रवृत्तिः ॥११५॥

DR.RUPNATHJI( DR.RUPAK NATH )

तस्याप्यभावो व्यवधानतः स्यात्
यथैव यद्दृष्टमिदं तथैव ।
लिङ्गादिधीरप्यत एव हेतुः
बहिःप्रमेयेन धियः प्रचारे ॥ ११६ ॥

अदृष्टमस्याजनने[1] निदानं
बहिःप्रयाणेऽपि निमित्तता कुतः ।
नीत्वाऽपि वा कुत्र विनिक्षिपेत्ताम्
अतीतमागामितयाऽवगाहते[2] ॥ ११७ ॥

तत्तुल्यरूपैव परोक्षवृत्तिः
अन्याऽपि सर्वा स्फुटमेयनिष्ठा ।
अतो मनोवृत्तिबहिःप्रचारः
परोक्षमेयेऽपि कथं घटेत ॥ ११८ ॥

अतो न पुंसाऽस्य घटेत योगो
विना न तं निह्नुतिरज्ञतायाः ।
ततोऽपरोक्षत्वनिवृत्तिरेवं
युक्ता च नो मानविभागवार्त्ता ॥ ११९ ॥

1 अदृष्टमस्याजनने
2 अतीतमागामि च याऽवगाहते





परोक्षमेयेन च बोधनाशं
विना धिया तत्प्रथनं कथं स्यात् ।
ज्ञानेऽपि नाज्ञाननिवृत्तिरस्ती-
त्येत्कथं युक्तिसहं भवेद्वः ॥ १२० ॥

मेयापरोक्षत्वनिरोधमूलम्
अज्ञानमत्र प्रहतं यदि स्यात् ।
पुरस्स्थितो वह्निरिवेन्द्रियेण
गिरिस्थितोऽपि प्रकटीभवेन्नः ॥ १२१ ॥

मात्रा वियोगात्प्रकटो न चेत् स्यात्
कथं तदाऽज्ञाननिवर्त्तनं वः ।
एकाश्रितं ज्ञानमबोधघाति
पुंसो वियोगेन[1] च तत्तथा स्यात् ॥ १२२ ॥

पुंवृत्तिबोधस्य बहिस्स्थितस्या-
ज्ञानस्य चैकाश्रयता तदा स्यात् ।
पुंसा यदा मेयगतानुभूतिः
न भिद्यतेऽज्ञाननिवासनीडम् ॥ १२३ ॥

1 पुंसो वियोगे न



DR.RUPNATHJI( DR.RUPAK NATH )

परोक्षवृत्त्या तमसो निवृत्तिः
स्फूर्त्या विना सिध्यति किम्बलेन ।
भ्रान्त्यादिनाशो हि तमोनिवृत्तिं
नापेक्षते निश्चयमात्रहेतुः ॥१२४॥

जानामि वह्निमिति धीरपि वह्निवृत्तिम्
आश्रित्य न स्पृहयतीह तमोनिवृत्त्यै ।
एनां विना यत इयं स्फुरणैकरूपे
दृष्टा सुखेऽपि न हि तत्र तमोनिवृत्तिः ॥१२५॥

ब्रह्मण्यपि स्फुरणशून्य इयं प्रसिद्धा
तेनाप्यबोधविरहो न हि तत्प्रमेयः ।
पुंसः प्रवृत्तिरपि बोधत एव सिध्येत्
यस्मात्पुमांश्चरति वस्तुनि सन्दिहानः ॥१२६॥

किञ्चैतदद्य सकलव्यवहर्त्तृसिद्धं
ज्ञातं हितं निजसुहृद्वचनेन लोकः ।
जिज्ञासते तदपरस्य न युक्तमेव
ध्वान्तक्षतेः किमपरं पुनरर्थनीयम् ॥१२७॥





अत्यन्तमुन्नतगिरेरुपरि प्ररूढ-
वृक्षे महत्यपि जनस्य सदा भ्रमोऽयम् ।
दूर्वासमोऽयमिति वो घटते न चायम्
अज्ञानमात्मजनकं न विना भ्रमोऽस्ति ॥१२८॥

उद्दिश्य साक्षात्कृतिमस्य भूम्नः
शब्दे न[1] युक्त्या च सुनिश्चितस्य ।
ध्याने यतन्ते ननु सा वृथा स्यात्
तया विनाऽपीप्सितलाभसिद्धेः ॥१२९॥

तस्मादबोधस्य निवृत्तिमात्म-
साक्षात्कृतेरिच्छत एवमन्यः ।
परोक्षबोधो न हि कस्यचित्स्यात्
ध्वान्तस्य नाशे निपुणोऽपि सुस्थः ॥१३०॥

व्यर्थोऽपि नायं पुरुषस्य चेष्टा
यतस्ततस्संशयघातिनस्स्यात् ।
स्वहेतुसत्त्वेति हि कार्य्यनाशः
सहस्रशो दृष्ट इहोपपन्नः ॥१३१॥

1 शब्देन



DR.RUPNATHJI( DR.RUPAK NATH )

यद्येवमात्मगत एव परोक्षबोधो
मेयेन सङ्ग इह को भवतो विचारे ।
सङ्गं विना नियतधीव्यवहारलोपः
स्पष्टप्रवृत्तिरपि वा नियता कथं स्यात् ॥१३२॥

युष्माभिरेव निपुणैस्सुविचार्य्य एष
येषां महाकृतिरियं व्यवहाररक्षा ।
अस्माकमत्र निजरूपमभीप्सतां किं
स्वप्नोपमव्यवहृतेः परिरक्षणेन ॥१३३॥

मायाऽत्र तिष्ठति जगज्जनने निदानं
या दुर्घटं घटयितुं प्रभुरीश्वरेण ।
तस्यां निधाय निखिलव्यवहारचर्चाम्
आनन्दमन्तरमलं [1]निजमाश्रितोऽस्मि ॥१३४॥

वक्तव्यमद्य यदि शक्तिरिह प्रसिद्ध-
मर्यादया पुनरसौ क इहात्मयोगः ।
सम्बन्धिनो हि पृथगेव निजात्तदीय-
सम्बन्ध इत्यभिमतं विदुषां स वः क्व ॥१३५॥

1 निजामाश्रितोस्मि





एका मतिः कथमियं प्रतियोगिकृत्यं
सम्बन्धकार्यमपि वोढुमलं तव स्यात् ।
एवं विनाश्य बहुविद्व्यवहारसिद्धम्
अस्मानधिक्षिपसि किं न विलज्जसे[1] त्वम् ॥१३६॥

योग्यत्वरूप इति चेद्भवताऽभ्युपेतम्
अस्त्वेवमेतदपि दत्तपदं क्व नु स्यात् ।
एकाश्रया न हि युतिः प्रथिताऽस्ति लोके
नष्टाश्रयञ्च किमपि क्व नु दृष्टमस्ति ॥१३७॥

लोके प्रसिद्धिमपहाय निजेच्छया त्वं
मार्गान्तरेण यदि यासि कथं निजाप्तः ।
संरक्षितः कथमयं व्यवहारमार्ग
एवं त्वया निजधिया व्रजता पुराणः ॥१३८॥

योग्यत्वमत्र वद कीदृशमस्तु जातिः
सर्वत्र वर्त्ति तदियं कथमन्यदस्तु ।
नानापदार्थघटनात्मकमेकमेवं
कस्याप्यभाव इह तन्न भवेत्कथञ्चित् ॥१३९॥

1 विलज्ञसे



DR.RUPNATHJI( DR.RUPAK NATH )

अस्माकमद्य मतमाकलय्य प्रसिद्धि-
स्त्रक्सर्पभोगसदृशैरनुभूतिसिद्धैः ।
संरक्षितैस्त्रिचतुरव्यवहारयुक्त्या
सर्वोऽपि सिध्यति महाजनसिद्ध एषः ॥ १४० ॥

एवं सतीह महतां सकला प्रसिद्धिः
सालम्बना भवति नैव मतान्तरेष्टा ।
तद्दुर्निरूपमिति चेदत एव माया
किं तन्निरूपणमृते परिहीयते नः ॥ १४१ ॥

स्वप्नेऽपि संव्यवहृतिः पुरुषार्थहेतुः
दृष्टा ततोऽपि किमु जागरणं प्रकृष्टम् ।
तस्मादबोधविभवेन महत्प्रसिद्धा
सर्वत्र संव्यवहृतिर्घटतेऽत्र पक्षे ॥ १४२ ॥

किञ्चाद्वितीयचितिरेव परोक्षमेयं
मात्राऽपि योजयति नैव मतिप्रसङ्गः[1] ।
यत्तत्तदाकृतिधियोपहितः प्रमाता
वित्तेस्तदाकृतिरिहाव(?)नुयायिकापि ॥ १४३ ॥

1 नैवमतिप्रसङ्गः





घटोऽपरोक्षोऽयमिति प्रसिद्धेः
मतेर्बहिस्सञ्चरणं न्यरूपि ।
नाऽत्रास्ति सा किन्त्विह योगमात्रम्
आकाङ्क्षितं तत्सुनिरूपितञ्च ॥ १४४ ॥

यद्येवमत्र भुजगोऽयमिति भ्रमो यः
तस्यापि रूपमुपवर्ण्य कीदृशं तत् ।
अध्यक्षमेतदिति चेत्क इहास्य हेतुम्
अक्षार्थयोगमुपवर्णयितुं समर्थः ॥ १४५ ॥

रज्वाऽक्षसङ्गतिरिहाक्षजबोधहेतुः
अन्यस्य बुद्धिजननी भवितुं न युक्ता ।
या या मतिर्भवति यत्र यदिन्द्रियेण
सा तस्य तस्य च समागमजैव नूनम् ॥ १४६ ॥

नो चेत्प्रसिद्धानुमितेर्विलोपो
वह्न्यादियुक्ते विषये भवन्त्याः ।
प्रत्यक्षहेतुर्बलवान्परोक्ष –
हेतोस्सकाशादिति वोऽपि सिद्धम् ॥ १४७ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

न प्रत्यभिज्ञानयनार्थयोगात्[1]
ऋते भवित्रीति न शङ्कनीयम् ।
यतोऽपृथक्स्मृत्यनुभूतिरूपा
तत्तांशसंस्कारयुगक्षजन्या ॥ १४८ ॥

तत्तोपलक्ष्यस्य पुरस्स्थितस्या –
भेदोऽपि तद्रूप इहाक्षयोग्यः ।
एवं सुगन्धीदमितीदृशानि
ज्ञानानि तान्यप्युभयात्मकानि ॥ १४९ ॥

वैशिष्ट्यमप्यत्र तथाविधासु
धीवृत्तिषु व्यक्तचितिप्रकाश्यम् ।
त्वग्घ्राणयोगादिदमेकमेव
द्याकारवस्तुग्रहणं न भिन्नम् ॥ १५० ॥

पञ्चेन्द्रियाणां युगपन्निजार्थ-
योगे तदर्थेषु मतिः कथं न ।
मनोऽणुतायां किमपि प्रमाणं
न वा तदर्थप्रमितिप्रभेदे ॥ १५१ ॥

1 प्रत्यभिज्ञा नयनार्थयोगात्





तस्माद्भुजङ्गादिभिरक्षयोगं
विना कथं स्याद्भुजगाकृतिर्धीः ।
न चासता तेन समागमोऽक्ष्णो
नो वा भवेद्दूरगतेन तेन ॥ १५२ ॥

नाप्यत्र सत्ता भुजगस्य बाधात्
भवेत्तदा भ्रान्तिरपि प्रमैव ।
न चेन्द्रियस्यार्थसमागमे वः
परोऽप्युपायोऽस्ति निरूपणार्हः ॥ १५३ ॥

न वाऽर्थयोगं परिहृत्य वृत्तिः
बहिश्चरेदित्यपि युष्मदिष्टम् ।
विनाऽपि धीवृत्तिविनिर्गमेण
बाह्यापरोक्षत्वमतिर्भवेद्धः ॥ १५४ ॥

परोक्षतैवास्त्विति चेदयुक्ता
तदाऽपरोक्ष्यव्यवहारबाधात् ।
अतोऽपरोक्षव्यवहारबीजं
बहिस्त्वदुक्तं घटतेऽत्र नैकम् ॥ १५५ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

मैवं मदुक्तविधयेद्मि तावदस्ति
साऽध्यक्षताऽवरणशून्यचितिस्वभावा ।
अध्यस्त एष भुजगाधिपतिश्च तत्र
साक्षात्कृतौ कथमियं वद तस्य न स्यात् ॥ १५६ ॥

तादात्म्यमेव कलशप्रमुखप्रपञ्चे
साक्षात्कृतत्वमनया प्रम(भ)याऽत्मवादे ।
तद्रज्जुसर्पसदृशे सकलेऽपि तुल्यं
तस्माज्जगत्स्फुरति नः पुरुषस्य भासा ॥ १५७॥

मायाविवर्त्ते प्रतिबिम्बिता चितिः
भुजङ्गमं तञ्च विवर्त्तमेकदा ।
आभासयत्यत्र न चेन्द्रियार्थ-
योगेन कृत्यं किमपीति केचन ॥ १५८ ॥

लिङ्गादिजन्योऽपि विपर्य्ययोऽस्ति
तत्राऽस्ति किञ्चिन्न विचारणीयम् ।
अर्थोऽस्तु मा वा न सदेव लैङ्ग-
ज्ञाने विभातीति निमित्तमस्ति ॥ १५९ ॥





संशयस्य वपुरुच्यतेऽधुना
यादृशं निजमतेन तद्भवेत् ।
भ्रान्तिवन्न हि तदिन्द्रियाद्भवेत्
इन्द्रियार्थघटनाविलोपतः ॥ १६० ॥

नापि साक्षिचितिरेव केवला
तत्समागममृतेऽस्य नो भवेत् ।
नाव्यवस्थमपि किञ्चिदस्ति यत्
साक्षिणा स्फुटमिहोपलभ्यते ॥ १६१ ॥

विकल्परूपं न किमिच्छसि त्वं
वस्त्वेव मायाऽघटितेऽपि कारणम् ।
तथा च तन्मन्दिरसाक्षिणा ते
घटिष्यते स्फूर्त्तिरियं च संशयः ॥ १६२ ॥

यथा हि शुक्तौ रजतं तथेदं
यथा च तस्य स्फुरणं तथास्य ।
तत्संशयत्वं न भवेच्च तद्वत्
नाज्ञातताधीरपि तद्वदेव ॥ १६३ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

अर्थाव्यवस्थास्फुरणं न संशयः
तदव्यवस्थोपगमो न युक्तः ।
समानसत्ताकमिथःपरिस्फुरद्-
विरोधिनोर्नैकगृहे निवासः ॥ १६४॥

अस्मन्मतेनैवमिदं[1] परन्तु
धीस्तुल्यहेतुप्रभवा न भिन्ना ।
मिथोविरुद्धद्वयगाहिनीव
न किञ्चि(ञ्च)नावद्यमिहास्ति पक्षे ॥ १६५॥

भ्रमे तु साक्षात्कृतिताबलेन
विरोधभानस्य विलोपतश्च ।
अर्थोऽभ्युपेयोऽत्र च नैतदस्ति
कस्मादयं तत्सदृशो भवेद्धः ॥ १६६॥

यद्यस्य साक्षात्कृतिता भवेद्धः
साक्षात्करोमीति धिया च भाव्यम् ।
उक्तेन मार्गेण तदास्पदस्या-
भावाच्च साऽप्यत्र कथं भवित्री ॥ १६७॥

1 अस्मन्मते नैवमिदं





तस्मादध्यक्षवृत्तिप्रतिफलितचितिर्ध्वान्तवृत्तिर्विकल्पः
तस्याधिष्ठानसंविन्ननु निजविषयं मोहवृत्त्याकृतिभ्याम् ।
युक्तं ताञ्चापि वृत्तिं प्रथयति न पुनर्वृत्तिरेवैवमर्था
तस्यां धर्म्यंशभानं न खलु यत इयं कोटिभाने नियुक्ता ॥ १६८॥

धर्म्यंशसाक्षी खलु मोहवृत्त्या
द्व्याकारया सम्परिवेष्टितोऽभूत् ।
इत्यस्ति तस्मिन्द्वयभानमेवं
सम्बन्धभाने स कथं न हीशः ॥ १६९॥

सम्बन्धियुग्मे खलु भासमानेऽ–
संसर्गबोधेऽसति तावतैव ।
संसर्गभानं ननु युक्तमेतत्
स्रक्सर्पयोगे खलु दृष्टमेवम् ॥ १७०॥

संसर्गितावृत्तिमपास्य योगः
स्रक्सर्पयोर्भाति मतद्वये नः ।
तस्याऽत्र सत्ता न हि भानबीजम्
अध्यक्षता तस्य तयोपजाता ॥ १७१॥

DR.RUPNATHJI( DR.RUPAK NATH )

अन्योऽपि यः प्रत्यय आश्रितः स्यात्
सर्वोऽपि मायाविभवोऽस्तु कामम् ।
इत्यात्मवादे क्रमभानमेव
जीवस्य चिन्मात्रतनोः प्रपञ्चे ॥ १७२ ॥

त्वं शुद्धमूर्त्तिरमलैकचितिस्वभावो
मायां प्रविश्य भगवन्युगपत्समस्तम् ।
वेत्स्यत्र मामकतनौ प्रतिलब्धबोधः
तत्तन्निमित्तवशगः क्रमशोऽपि वेत्सि ॥ १७३ ॥

एवं प्रविश्य चितिमात्रतनुः परात्मा
स्वाज्ञानमल्पवपुरप्यपरं प्रमाता ।
भूत्वा च काममय एव करोमि सर्वं
पुण्यं तथेतरदपि श्रुतिलोकसिद्धम् ॥ १७४ ॥

कृत्वा च तत्परवशो विरुदन्हसन्वा
भुङ्क्तेऽशुभं शुभममिश्रमिहैव मिश्रम् ।
भुक्त्वा पुनस्तदनुरागमयोऽयमेत्य
लोकेऽत्र कर्म कुरुते भृशमत्र सक्तः ॥ १७५ ॥





एवं कपूयचरणेन तथेतरेणा-
प्यापद्मयोनिभवनादिह वा च वृक्षात् ।
गच्छत्यजस्रमिह विष्टिगृहीतवत्ते
देव्या विमोहितमतिर्भगवन्प्रसीद ॥ १७६ ॥

तापत्रयेण परितः प्रकटेन चेतः
सम्प्लुष्यते प्रशमयाशु कृपाम्बुवर्षैः ।
त्वद्वीक्षणामृतरसाप्लुतमेव नाथ
त्वामीक्षितुं क्षममिदं नु सुखैकतानम् ॥ १७७ ॥

त्वच्चिन्तया यदि मनः परितोषमीयात्
त्वत्सन्निधानमिह सम्भवि ते प्रसादात् ।
त्वां त्वत्प्रसादत इहैव लभेय वेदोऽ–
प्याहैष यं प्रवृणुते स च तेन लभ्यः ॥ १७८ ॥

यत्त्वद्वचो हृदयमीश विचित्रमार्गं
तत्त्वत्प्रसादनमृते न सुखावसेयम् ।
सर्गस्थितिप्रलयसंयमनादिलीलं
त्वां सर्वरूपवपुरित्यपि गूढभावः ॥ १७९ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

निश्शेषभेदरहितं तव सत्प्रकाशम्
आनन्दमेकरसमित्यपरञ्च रूपम् ।
वेदः पुनः पुनरयं महताऽदरेण
प्राह प्रभो कुरु हरे कृपयार्द्धितं माम् ॥ १८० ॥

अन्यच्च दिव्यमशुभघ्नहिरण्मयादि
रूपं सहस्रभुजनेत्रपदं तवोक्तम् ।
यच्चेतसि स्थितमनन्तगुणं प्रभूणाम्
अप्याश्रयं निरुपमं तनुते प्रभुत्वम् ॥ १८१ ॥

अस्थूलमित्यपरमस्ति वचस्त्वयीश
सर्वं निवारयदुपाधिमनन्यभावम् ।
तेनैष वैदिकजनः परिगूढरूपे
मोमुह्यते किल ततो विवृणु स्वरूपम् ॥ १८२ ॥

ईशानविष्णुवपुषा पुनरेक आहुः
भिन्नं भवन्तमपरे तु बहुप्रकारैः ।
कस्तद्विभोऽतिगहनं तव वाक्यभावम्
ईष्टेऽवगन्तुमपहाय भवत्पदाब्जम् ॥ १८३ ॥





यस्तु त्वयैव विभुनोक्तममानितादि
सच्छ्रद्धया च परयाऽनुपदं करोति ।
त्वामात्मना निजगुरुं च परेशबुद्ध्या
संसेवते स हि विबोद्धुमलं वचोऽर्थम् ॥ १८४ ॥

सृष्ट्याद्यशेषवचनं ह्यमुना मिषेण
त्वय्येव सर्वमधिवासयति प्रपञ्चम् ।
अण्वादिवृत्तिमतिमस्य निरस्यदीश
न त्वामनेन शबलं पुनराह सिद्धम् ॥ १८५ ॥

कार्यं हि सत्प्रकृतिकं ननु दृष्टमेतत्
तद्वत्समस्तमपि तत्प्रकृतीति सिध्येत् ।
मानान्तरेण विदितं तु न मेयमस्य
वाक्यस्य तच्छबलता श्रुतितो न लभ्या ॥ १८६ ॥

किञ्चाप्रयोजनजगत्प्रकृतित्वमीश
वाक्यं ह्यधीतिविधिना नियमेन लब्धम् ।
वक्तुं न पारयति किं निरवद्यमत्र
श्रेयस्ततोऽपि न भवेच्छ्रुतिरत्र मानम् ॥ १८७ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

दुःखञ्च नानात्वधियोपलब्धं
सन्ध्ये तथात्रापि बहुप्रकारम् ।
मृत्योस्स मृत्युं समुपैत्यदोऽपि
वचस्ततो वेदयतीश पीडाम् ॥ १८८ ॥

एकाकिनोऽप्यस्ति भयं तदद्धा
तस्यापि नानात्वधियैव तत्तु ।
यत्कोऽपि नास्तीति धिया तदानीं
दुःखं विसृज्य स्वयमेव सुस्थः ॥ १८९ ॥

यस्मान्मदन्यन्न हि किञ्चिदस्ति
कस्माद्बिभेमीति वचस्तदानीम् ।
पीडानिवृत्तिं तत एव शास्ति
भेदे वचो नैव भवेत्प्रमाणम् ॥ १९० ॥

मायाभिरिन्द्रः पुरुरूप ईयते
मायीव लोके बहुरूपवेषभृत् ।
अतोऽपि भेदस्य न मानचिन्तया
प्रपीडनीयं मन आत्मवेदिना ॥ १९१ ॥





द्युभ्वादि यत्रात्मनि वर्त्तते तम्
आत्मानमेकं ननु जानथेति ।
अन्याश्रया वाक्च विसर्जनीये-
त्याहेति भेदे न वचः प्रमाणम् ॥ १९२ ॥

तस्मान्निषेधेन समस्तभेद-
वाक्यं समन्वेति निषेध्यकाङ्क्षिणा ।
तत्तु प्रधानं फलवद्यतो हि
प्रधानकाङ्क्षैव नियामिकान्वये ॥ १९३ ॥

अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमितीदृशं वचः ।
प्रपञ्चशून्यात्मविनिश्चयेन नो
मुक्तिर्भवेन्नूनमिति स्म गर्जति ॥ १९४ ॥

दृष्टं प्रपञ्चोपशमस्वरूप-
ज्ञानं सुखायेति सुषुप्तिकाले ।
नो चेत्प्रियाश्लेषसुखे निमग्नोऽ-
प्याकाङ्क्षति स्वापमिदं कथं स्यात् ॥ १९५ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

तद्धि प्रधानं फलवद्यदङ्गं
तत्सन्निधौ यत्फलवर्जितं तत् ।
प्रधानकाङ्क्षावशगं निषेधा-
काङ्क्षास्पदं बोधयदेकवाक्यम् ॥ १९६ ॥

मानान्तरेणानवबुद्धमर्थवद्-
वचःप्रमेयं विधिवाक्यमेयवत् ।
निषेधवाक्यञ्च तथाविधार्थगं
तस्मात्तदेवोपनिषत्प्रमापदम् ॥ १९७॥

क्वचित्पुनः प्राग्विदितं परस्य
मूर्त्ताद्यमूर्त्तादि च रूपमन्यत् ।
अनूद्य सर्वं प्रतिवक्ति भूयो
नेतीति तस्मात्क्व भिदा क्व वेदः ॥ १९८॥

उपासनावाक्यसमीपगामि-
वाक्यस्य तात्पर्यमुपास्तिकार्य्ये ।
न स प्रपञ्चत्व[1] इति प्रभोः स्यात्
ततोऽपि सा नान्वितधीः प्रमाणम् ॥ १९९॥

1 सप्रपञ्चत्व





एवं समस्तश्रुतिमस्तकस्थ-
निषेधवाक्यं परिशोधयत्पदम् ।
विष्णोः शरद्व्द्विमलं करोति
सत्यादिवाक्यं तु विधानरीत्या ॥ २००॥

एवंविधोऽपि परमो निजपादपद्म-
द्वन्द्वार्चनेन कृतिनो भवमुत्तरन्तु ।
इत्याशयेन कृपया खलु तत्र तत्र
प्रादुर्भवत्यनुयुगं ननु माययेशः ॥ २०१॥

मायायां प्रतिबिम्बिता चितिरियं जीवाभिधाना भवेत्
यत्तत्सप्रतियोगिकं किमपि तद्बिम्बाभिधानास्पदम् ।
तद्युक्ता चितिरेव पूर्णवपुषा बिम्बं स एवेश्वरः
तस्या अप्रतिरुन्धती निजपदं तत्रापि सा तिष्ठति ॥ २०२॥

नीरूपरूपादि वियच्च लोके
दृष्टं हि तोये प्रतिरूपमञ्चत् ।
स्वल्पेऽपि तस्मिन्नतिदूरदेशे
चन्द्रादिदृष्टिर्घटतेऽन्यथा किम् ॥ २०३॥

DR.RUPNATHJI( DR.RUPAK NATH )

रूपादिहीनोऽप्यगुणोऽयमात्मा
मायां विशत्वत्र किमस्त्यवद्यम् ।
बुद्ध्याद्यवच्छिन्नचिदेव जीव
इत्येतदारात्समुपेक्षणीयम् ॥२०४॥

अवच्छिन्नबोधो यदि त्वन्मते ना
तदा वोऽनवच्छिन्न एवेश्वरः स्यात् ।
तदाऽव्याप्यवृत्तिर्नजर्थो भवेद्वः
कथं तेन युक्तः प्रभुः सर्वगः स्यात् ॥२०५॥

विना सर्वगं देवमीशानमेकं
जगद्योनिता कस्य युष्मन्मतेऽपि ।
भवेदेवमीशः कथं सर्ववित्स्यात्
तदेशावबोधार्थसंयोगलोपात् ॥२०६॥

न हि पूर्णचितिः परो भवेत्
अवरोऽपि प्रभुरेव किं न ते ।
न हि शुद्धचितेरयं पृथक्
कथमस्य स्वत एव मुक्तता ॥२०७॥





ईशः सेव्यः सेवकस्तस्य जीवो
विष्णोः सेवा जीवसर्वार्थदात्री ।
इत्यादिस्ते नैव सिद्ध्येत पक्षे
व्यावृत्तोऽतः सर्वगोऽप्येष बद्धात् ॥२०८॥

बिम्बं हि पूर्णं पृथगप्यमुष्मात्
अज्ञात्तथादर्शनतो मुखादौ ।
सम्पूर्णवक्त्रप्रतिबिम्बभावे
बिम्बाननं दृष्टमखण्डमेव ॥२०९॥

अज्ञाने शुद्धसत्त्वे प्रतिफलितचितिर्नूनमीशो न बिम्बं
तच्छुद्धं हृन्निविष्टा पुनरियमवरोऽहम्मतेस्तत्र दृष्टेः ।
अज्ञानोत्थप्ररोहोऽप्यखिलजगदिदं व्याप्य तिष्ठत्यजस्रं
सर्वज्ञः सर्वशक्तिर्हरिरिति विमलं केचनाचक्षते तत् ॥२१०॥

मायाऽपि तावदनयैव भवत्यनन्ते
यत्सा स्वतोऽपि न सती तदियं तथैव ।
यद्दुर्घटं भवति तन्ननु माययेति
वृद्धप्रसिद्धिरपविद्धमलस्ततोऽसि ॥२११॥



DR.RUPNATHJI( DR.RUPAK NATH )

एवं सतीश घटते ननु सा कृपाऽपि
नो चेत्कथं भवति सा त्वयि निर्विकारे ।
मत्पार्श्वगोऽयमधुना परिपालनीय
एवंविधा भवति मायिकवृत्तिरेषा ॥२१२॥

कर्मोद्भवोऽपि भवतो दयया प्रसादो
यो बादरायणमते श्रुतितः प्रसिद्धः ।
प्रीतिश्च तृप्तिरिति च श्रुतिसिद्ध एष
न ह्यन्यतृप्तिघटना त्वयि नित्यतृप्ते ॥२१३॥

तृप्तः प्रभुः पशुभिरेनमथ प्रजाभिः
सन्तर्पयेदिति वचः स्फुटमत्र मानम् ।
दृष्टे च सम्भवति नैवमदृष्टमस्ति
कर्मोत्थमित्थमिह राजसु दृष्टपूर्वम् ॥२१४॥

नित्याप्तकाममिममीश्वरमाह वेदः
तस्मादमुष्य वपुषा  घटना कथं स्यात् ।
न ह्यस्ति कर्मजवपुर्घटना न वाऽस्ति
मिथ्यामतिस्तत इयं भवतीश माया ॥२१५॥





ईशानकृष्णवपुरादिभिरेक एव
सर्वेश्वरो विहरति स्ववशो हि विष्णुः ।
नानेश्वरत्वविरहाच्छ्रुतितोऽविशेषात्
तस्मादबोधमहिमैव समस्त एषः ॥२१६॥

सत्यादिवाक्यस्थपदानि लोके
तत्तद्विशिष्टस्य हि वाचकानि ।
वेदान्ततात्पर्यपदं त्वखण्डं
वृत्त्या पुनर्लक्षणया वदन्ति ॥२१७॥

तत्तद्विशिष्टार्थसमन्वयस्य
वेदान्ततात्पर्यविरुद्धभावात् ।
तात्पर्यमस्य प्रथमोदितेन
न्यायेन सिद्धं हि सुखैकताने ॥२१८॥

कस्यापि शब्दस्य न शक्तिरस्ति
पूर्णे सुखे ब्रह्मणि मय्यधीशे ।
विशेषहेतोर्विरहात्तदा हि
पर्यायता सर्वपदस्य नूनम् ॥२१९॥

DR.RUPNATHJI( DR.RUPAK NATH )

लोकप्रसिद्धार्थसमागमेन
वृत्त्यन्तरेण प्रतिपादिते सति ।
शक्त्यन्तरं तत्र न कल्पनीयं
तथा सतीह क्व नु लक्षणा भवेत् ॥२२०॥

सर्वं हि तन्नीडमिदं विशिष्टं
तच्चापि बुद्धं श्रवणादिनैव ।
सम्बन्धबोधे सति नास्ति माना-
भावेन लक्ष्यप्रमितेर्विलोपः ॥२२१॥

दृश्यस्य सर्वस्य मृषात्वनिश्चयात्
योग्यत्वबुद्ध्यैव भवेत्पदेभ्यः ।
अखण्डसच्चित्सुखमात्रगोचरा
सत्यादिवाक्यार्थमितिप्रसिद्धिः ॥२२२॥

लोकेऽपि यल्लक्षणवाक्यमेयम्
अखण्डमेतद्धि बुभुत्सितं नः ।
साप्यस्य सन्देहत इत्थमत्र
शब्दस्य वृत्तिर्न विशिष्टरूपे ॥२२३॥





व्यक्त्यप्रबुद्धत्वमृते च कस्य
सन्दिग्धभावो घटते यदीह ।
व्यक्तेरसाधारणरूपबोधे
वदास्ति गोत्वादिषु संशयस्ते ॥२२४॥

व्यक्तेरसाधारणरूपमस्ति
तद्धर्मयोग्यं तदृते कथं सः ।
अस्यैव न ह्यस्ति समानरूपेऽ–
साधारणो धर्म इहेति युक्तिः ॥२२५॥

योग्यत्वमप्यस्य पृथग्यदि स्यात्
तदाश्रयत्वार्थमतोऽन्यदेवम् ।
तत्तद्विमानावधिधर्ममाला
प्रसज्यते नूनमतो न युक्तम् ॥२२६॥

जातेस्स्वरूपं यदि तद्विशेषः
तदाश्रयस्यापि तदस्तु रूपम् ।
न गोत्वतादिः प्रमितिप्रसिद्धो
न वाऽवबोद्धुं क्षमतेऽपि कश्चित् ॥२२७॥



DR.RUPNATHJI( DR.RUPAK NATH )

गवेतरावृत्तितया विशिष्टा
समस्तगोव्यक्तिषु वृत्तिता सा ।
विशेषणस्य प्रमितिर्भवेद्धो
न गोत्वताबुद्धिमृते कथञ्चित् ॥२२८॥

अबुध्यमाने प्रतियोगिरूपे
विशिष्य तन्नेति कथं मतिस्स्यात् ।
गोत्वत्वमेवास्य विशेष इत्थम्
आयाति नूनं स परस्पराश्रयः ॥२२९॥

समस्तगोव्यक्तिधियं विना वा
तद्वृत्तितां कः प्रतिपत्तुमीष्टे ।
तस्माद्विशेषो भवति स्वरूपं
जातेस्तथास्याश्च न कोऽपि भेदः ॥२३०॥

ततो गवाध्यक्षजबुद्धिरेषा-
प्यापातरूपेति हि संशयस्स्यात् ।
असौ भवेद्गौरथ वाच्य एवे-
त्याबालवृद्धस्य स हि प्रसिद्धः ॥२३१॥





न वाच्यतायास्स न वा परस्मात्
व्यावृत्तताया न च लक्षणस्य ।
सामान्यतस्तत्प्रथनाद्विशेषे
व्यक्त्यप्रबुद्धत्वमृते कथं नु ॥२३२॥

गोव्यक्तिरेषाऽनवबुद्धरूपा
सन्दिह्यते सैव बुभुत्स्यते च ।
अतोऽत्र तल्लक्षणवाक्यमेतत्
तामेव लक्ष्यां प्रतिपादयेन्नः ॥२३३॥

अतः प्रसिद्धं वचसामखण्ड-
मेयं ततोऽलौकिककल्पना न ।
सत्यादिवाक्यश्च भवत्स्वरूप-
सच्चित्सुखाद्वैतपरं तथेश ॥२३४॥

कामादिवृत्तिस्त्वहमि प्रसिद्धा
कामादिवाक्यैश्च निजानुभूतेः ।
प्रत्यक्षसङ्गोऽयमकामशोक
इत्यादिवाक्यादनुभूतिरेव ॥२३५॥



DR.RUPNATHJI( DR.RUPAK NATH )

एवं महावाक्यजधीप्रसिद्धं
ब्रह्माद्वयं सत्सुखचिद्घनं नः ।
अतस्त्वयीशे निखिलोऽपि वेदः
तात्पर्यतः पर्यवसानमेति ॥२३६॥

एवं तवेशचरणाम्बुरुहप्रसादात्
धीरो विधूतमदमत्सरमानमोहः ।
त्यक्तैषणः परदृशा गुरुणोपदिष्टं
भूमानमात्मनि ततं ननु पश्यति त्वाम् ॥२३७॥

नद्धाक्ष एव विपिनं गमितो यथाप्त-
सन्दर्शितेन समुपैति पथा पदं स्वम् ।
एवं त्वयैव गुरुणा निपुणोऽनुशिष्टः
त्वामेष पश्यति पुरः परितोऽपि देव ॥२३८॥

यत्सत्समस्तनिलयो यदबोधबोधो
यन्नस्सुखं कमलजादिपिपीलिकान्तम् ।
तच्छुद्धमेकमुपशान्तविशेषयोगं
भूमा हरिर्विजयते निखिलान्तरात्मा ॥२३९॥





अहं स एवास्मि यतः प्रसूतं
रज्वा इवाहिर्वियदाद्यशेषम् ।
यस्मिंस्तथा तिष्ठति लीयतेऽन्ते
तदाश्रयो विष्णुरनाश्रयो यः ॥२४०॥

एवं हरेऽखिलगुरो विदितं मयैतत्
त्वत्तोऽनवद्यमथवा मम चित्तदोषात् ।
यद्यस्त्यवद्यममुनेश निवेदनेन
भूयात्तदप्यमलमेव तव प्रसादात् ॥२४१॥

नृसिंहविज्ञापनमेतदार्या
विशुद्धचित्ताः परिभावयन्तु ।
युष्मद्विचारेण तथा विशुद्ध्येत्
यथेश्वरस्यामलदृष्टिपातात् ॥२४२॥

नृसिंहविज्ञापनमेतदित्थं
नृसिंहनाम्ना यतिना व्यधायि ।
नृसिंहशेषात्मजरामचन्द्र-
सम्प्रार्थनावर्जितमानसेन ॥२४३॥

DR.RUPNATHJI( DR.RUPAK NATH )

इदं गुरोश्श्रीपदपद्मचिन्ता-
दिवाकरोद्योतितमार्गलब्धम् ।
ब्रह्मात्मबोधप्रतिरोधमूलम्
उद्धर्त्तुमिच्छा यदि वोऽस्तु तुष्ट्यै ॥२४४॥

जगन्नाथाश्रमगुरोश्चित्रं चरणरेणवः ।
वाचामगोचरेऽप्यर्थे मूकं वाचालयन्ति माम् ॥२४५॥

अहं कियानेष गुरोः प्रसादः
को वाऽमरेन्द्रैर्मनसाऽप्यलभ्यः ।
प्रसादिते देववरे मुरारौ
न किञ्चिदप्राप्यमिहेति मन्ये ॥२४६॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनृसिंहाश्रममुनिविरचितं
नृसिंहविज्ञापनं समाप्तम् ॥
॥ इति शम् ॥

DR.RUPNATHJI( DR.RUPAK NATH )



यस्माद्धियेव मनसा सह वैदिकी वाग्
दूरे चरत्यमुमथापि तदेकभावा ।
आनन्दबोधघनमेकमशेषयोनिं
संसूचयत्यहमिमं नृहरिं प्रपद्ये